संस्कृत-वार्ता:
17.09.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री श्रीनरेन्द्र मोदी ओडिशा सर्वकारस्य महिला-केन्द्रित-प्रमुख-योजनां, सुभद्रा योजनाम् उद्घाटितवान्। एतद् अतिरिच्य श्रीमोदी समस्ते देशे प्रधानमन्त्रि-आवास-योजना-ग्रामीणस्य अन्तर्गतं प्राय: दश लक्ष-मितेभ्य: लाभार्थिभ्य: प्रथमं किस्त इत्याख्यं धनपुटकमपि समर्पितवान्।
- केन्द्रीय-गृहमन्त्रिणा अमितशाहेन प्रोक्तं यत् नरेन्द्र-मोदिन: सर्वकारस्य तृतीय-कार्यकालस्य प्रथमेषु शत-दिनेषु पञ्चदश लक्ष-कोटि-रूप्यकाणां परियोजना: प्रारब्धा: सन्ति।
- राष्ट्रपति: द्रौपदीमुर्मू: नव-दिल्ल्यां भारतस्य अष्टम-जल-सप्ताहस्य उद्घाटनं विहितवती। अथ च जल-संरक्षणस्य कृते जनान्दोलन- विधानस्य आवश्यकतायां बलं दत्तवती।
- दिल्ल्या: मुख्यमन्त्रिणा अरविन्दकेजरीवालेन अद्य मुख्यमन्त्री पदात् त्यागपत्रं प्रदत्तम्। आम आदमी पार्टीति दलेन दिल्ल्या: नवीन-मुख्यमन्त्रित्वेन नामिता अतिशी वर्या।
- पेरू-देशे व्यापक-वनाग्निकाण्डे पञ्चदश जना: मृता:, विशालं शस्यक्षेत्रं कृषिभूमिक्षेत्रं च वनाग्निना भस्मसाद् भूतम्।

<u>प्रधानमन्त्री-भुवनेश्वर</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य ओडिशा सर्वकारस्य महिला-केन्द्रितं पदक्षेपं, सुभद्रा-योजनया साकं भुवनेश्वर-मध्ये रेल-पट्टिकाया: राष्ट्रिय-राजमार्ग-परियोजनाया: च शुभारम्भं कृतवान्। तत्र हि बीजू-पटनायक-अन्ताराष्ट्रिय-विमान-पत्तने प्रधानमन्त्रिण: मोदिन: शुभागमने तस्य भव्यं स्वागतं समनुष्ठितम्, यत्र च आदिवासी-लोक-नृत्यै: ढोल-इत्याख्य-वाद्य-यन्त्रै: च पारम्परिकरीत्या श्रीमोदिन: स्वागत-सपर्या सम्पादिता। श्रीमोदिन: जन्मदिवसावसरे पारेसहस्रं समर्थकै: तस्य अभिनन्दनम् अभिवादनं च कृतम्। भुवनेश्वरस्य जनता-मैदान-प्राङ्गणे परियोजनानाम् उद्घाटनस्य अनन्तरं तत्रस्थितां विशालां जनसभां सम्बोधयन्, प्रधानमन्त्री प्रोदितवान् यत् एक-कोट्यधिका: महिला: 'सुभद्रा योजनाया: लाभं स्वीकर्तुं शक्नुवन्ति। श्रीमोदी प्रोदितवान् यत्, राष्ट्रस्य विकास: महिलानां सहभागितायां निर्भरति। अथ च महिलानां समेधिता क्षमता ओडिशाया: विकासस्य मूल-मन्त्र: भविष्यति। प्रधानमन्त्री

प्रोक्तवान् यत्, आर.बी.आई. 'डिजिटल-मुद्रा-पायलट -परियोजनापि' अनया योजनया साकं संयोजिता अस्ति। एष: एतादृश: प्रथम: प्रकल्प: अस्ति।

एतद् अतिरिच्य, प्रधानमन्त्री भुवनेश्वरस्य गड़काना मध्ये एकस्यां झुग्गीति निर्धन-वसतौ अपि भ्रमणं कृतवान्। तत्र हि पौरावासयोजनाया: विंशतिः लाभार्थिभि: साकं प्रधानमन्त्री सम्भाषितवान्। अत्रावसरे अमुना भणितं यत् एकस्य परिवारस्य एकया भगिन्या तस्मै पायसम् अपि भोजनार्थं प्रदत्तम्। तदा मोदिना प्रोक्तं यत् पायसान्न-भोजन-समये तेन मातु: स्मरणं कृतम्। ध्येयम् अस्ति तत्र प्रधानमन्त्री अष्ट-शताधिक-द्वि-सहस्र-कोटि-रूप्यकाणां रेल-परियोजनानाम्, एक-सहस्र-कोटि-रूप्यकतोSधिकानां रूप्याकाणां राष्ट्रिय-राजमार्ग परियोजनानां चापि उद्घाटनं कृतवान्।

## पीएम-विश्वकर्मा जयंती

अद्य समस्ते देशे विश्वकर्मा जयंती महता उल्लासेन परिपाल्यते। अस्मिन् पावने अवसरे प्रधानमन्त्रिणा श्रीमोदिना मंगलवचोभि: देशस्य नागरिका: वर्धापिता: सन्ति। एकस्मिन् सामाजिक संजालीये संदेशे श्रीमोदिना लिखितं यत् ते सर्वे कठिन-कर्मकरा:, कार्मिका:, शिल्पकारा:, रचनाकारा:, हस्तशिल्पकाराश्च नितरां प्रणम्या: सन्ति। यै: राष्ट्रनिर्माणे नैजं भृशं योगदानं प्रदीयते।

## आम आदमी पार्टीति

दिल्ल्या: मुख्यमन्त्रिणा अरविन्दकेजरीवालेन अद्य मुख्यमन्त्री पदात् त्यागपत्रं प्रदत्तम्। असौ अद्य सायं दिल्ल्या: उपराज्यपालं वी.के.सक्सेना वर्यं सम्मिल्य नैजं त्यागपत्रं समार्पयत्। अथ च अत्रावसरे आम आदमी पार्टीति दलेन अद्य घोषणा कृता यत् दलस्य वरिष्ठा नेत्री आतिशी दिल्ल्या: नवीना मुख्यमन्त्री भविष्यति। अद्य नव दिल्ल्याम् आप-दलस्य विधायकानाम् उपवेशनस्य अवसरे एषा आप-विधायक-दलस्य नेत्री प्रचिता अस्ति। उपवेशनस्य अनन्तरं सञ्चार-माध्यमै: साकं सम्भाषणावसरे दिल्ल्या: मन्त्री गोपाल राय: उक्तवान् यत् आगामि-विधानसभा-निर्वाचनं यावत् एकमतेन निर्णीतम् अस्ति यत् आतिशी एव मुख्यमन्त्री स्थास्यति। सञ्चार-माध्यमै: साकं सम्भाषणावसरे दिल्ल्या: नवीना मुख्यमन्त्री आतिशी दल-प्रमुखं प्रति आभार-भारं प्रकटयन्ती प्रोदितवती यत् सा कठिन-परिश्रमं करिष्यति। अमुना एतदपि प्रोक्तं यत् दिल्ल्यां पूर्वतः एव प्रचाल्यमाना: लोककल्याणकर-योजना: यथावस्थमेव प्रचलिष्यन्ति।

भारत-जल-सप्ताहः

राष्ट्रपतिः द्रौपदीमुर्मू अद्य नवदिल्ल्याः भारतमण्डपं इति स्थाने अष्टमं भारत-जल-सप्ताहम् उद्घाटितवती। अस्मिन् अवसरे राष्ट्रपतिः प्रोक्तवती यत्, 'आजादी का अमृतमहोत्सव' इत्यस्य अवसरे अमृतसरोवराणां निर्माणं कृतमस्ति। अनेके जलाशयाः पुनरुज्जीवीकृता: सन्ति। चतुर्दिवसीये एतस्मिन् कार्यक्रमे, चत्वारिंशद्देशानाम् प्रायः चतु:सहस्रम् प्रतिनिधयः भागं ग्रहीष्यन्ति, तथा च प्रदर्शन्यां शताधिका: प्रदर्शका:, नवाचार-संस्थाः च जलक्षेत्रे स्वविचारान् प्रकटयिष्यन्ति ।

अमितशाह:

केन्द्रीय-गृहमन्त्रिणा अमितशाहेन प्रोक्तं यत् नरेन्द्र-मोदिन: सर्वकारस्य तृतीय-कार्यकालस्य प्रथमेषु शत-दिनेषु एव पञ्चदश लक्ष-कोटि-रूप्यकाणां परियोजना: प्रारब्धा: सन्ति। अनेन राष्ट्रस्य विकासे महद्योगदानं भविष्यति। नवदिल्ल्याम् संचारमाध्यमै: समं सम्भाषमाण: श्रीशाह: प्रोक्तवान् यत् प्रशासनेन आधारिक-संरचना-परियोजनानां कृते त्रिलक्षकोटिरूप्यकाणां घोषणा विहितास्ति। येन देशस्य आधारभूता: संरचना: जनेभ्य: समुपपादिता: स्यु: ।

मोदिने-जन्मदिवस-शुभकामना

राष्ट्रपतिः द्रौपदीमुर्मुः उपराष्ट्रपतिः जगदीपधनखडः च प्रधानमन्त्रिण: नरेन्द्रमोदिन: जन्मदिवसमुपलक्ष्य तस्मै शुभाशंसा: प्रेषितववन्तौ। अस्मिन् अवसरे राष्ट्रपतिः न्यगादीत् श्रीमोदी स्वप्रतिभायाः कार्यस्य च माध्यमेन देशस्य समृद्धिं प्रतिष्ठां च वर्धितवान्। राष्ट्रपतिः तस्य दीर्घं, स्वस्थतामयं, प्रसन्नं च जीवनं प्रार्थितवती । उपराष्ट्रपतिः अवदत् यत्, दशकद्वयं यावत् स्वस्य शासनस्य माध्यमेन, दशकं यावत् प्रधानमन्त्रिरूपेण च, श्रीमोदी देशस्य आत्मानं जागरितवान् अपि च देशस्य अस्य सांस्कृतिक-मूल्यानाम् उद्दीपनम् सभ्यताविषयकमूल्यानां च पोषणं कृतवान्, विकसित-भारतस्य कृते अभूतपूर्व-विकासमार्गस्य दृढतया प्रवर्तनम् अपि कृतवान्।

## बुकर पुरस्कार घोषणा

अस्य वर्षस्य बुकरइति पुरस्कारस्य घोषणा जाता। ऐदम्यप्राथम्येन पञ्च-पञ्चाशद्वर्षाणाम् इतिहासे सर्वाधिकाः महिलाः सम्मिलिताः सन्तीति । अस्यां घोषितसूच्यां पूर्वपुरस्कारविजेत्री महिला आन्ने मैकेल्स् इत्येषा, अमेरिकीय -लेखिका पर्सिवल् एवरेट् इत्येषा, ब्रिटेनदेशीया-लेखिका सामन्था हार्वे इत्येषा च सन्तीति।

## पेरू- अग्निकाण्डं

पेरूदेशस्य विभिन्न-भागस्थेषु अरण्येषु दुरापन्नेन भीषण-वह्नि-काण्डेन न्यूनान्न्यूनाः पञ्चदश जनाः अग्निसाद्भूताः सूच्यन्ते। त्रि-सहस्र-प्रहलतोऽप्यधिकं शस्यं विनष्टं जातम् । पेरू देशस्य प्रधानमन्त्री "गुस्तावो एद्रियांजेन" इत्यसौ एंडियान-अरण्यस्य, एमजोन-अरण्यस्य च समीपस्थेषु क्षेत्रेषु घास-प्राङ्गणेषु अग्नि प्रज्वालनं निषेधितवान् अस्ति। यतोहि तत्र हि घोरेषु अरण्येषु अग्निकाण्डं द्रुतं द्रुतं प्रसरति।

## हैदराबाद-मुक्ति-दिवसावसरः

केन्द्रीयः अङ्गार- खनन-मन्त्री जी. किशन रेड्डी इत्येषः अथ च मुख्यमन्त्री रेवन्तरेड्डी अद्य हैदराबाद-मुक्ति-दिवसावसरे आयोजितेषु विभिन्नेषु कार्यक्रमेषु राष्ट्रियध्वजं दोधूयमानं कृतवन्तौ। केन्द्रीय-संस्कृति-मन्त्रालयेन केन्द्रीय-गृह-मन्त्रालयेन च हैदराबाद-मुक्ति-दिवसस्य नाम्नि आयोजिते कार्यक्रमे केन्द्रीयः मन्त्री केन्द्रीयारक्षितारक्षिबालानां निरीक्षणमकरोत् अपि च गार्ड ऑफ़ हॉनर इति राजकीय-सम्मानमपि लब्धवान्। समग्रे राज्ये दिवसोऽयं देशभक्तिभावेन सोत्साहं च आमन्यते |

## नौसैन्य-सम्मेलनम्

ऐषमः नौसैन्यबलस्य कमांडर इति समादेष्टाधिकारिणां सम्मेलनस्य द्वितीय- संस्करणस्य आयोजनम् अद्य नवदिल्ल्यां आरब्धम् । एतत् सम्मेलनं नौसैन्यबलस्य समादेष्टाधिकारिणां महत्त्वपूर्ण-रणनीतिकस्य, सेना-सम्बद्ध-कार्य-सञ्चालनस्य, प्राशासनिक-प्रसङ्गानां च विषयेषु विचार-विमर्शस्य कृते सौविध्य-प्रदानस्य शीर्षस्तरीयः द्विवार्षिकः कार्यक्रमः अस्ति। रक्षामन्त्रालयेन प्रकल्पितस्य अस्य , चतुर्दिवसीय-सम्मेलनस्य आरम्भः नौसेनाप्रमुखस्य उद्घाटनसम्भाषणेन सञ्जातः। नैके सैन्याधिकारिणः अस्मिन् कार्यक्रमे भागं भजन्ति।

जम्मूकश्मीर-विधानसभा

जम्मूकश्मीरे श्वः सम्भाव्यमानाय विधानसभानिर्वाचनाय सर्वाः सज्जताः सम्पूरिताः | यतो हि श्वः विधानसभानिर्वाचनस्य प्रथमचरणीय मतदानमस्ति। एतस्मिन् चरणे सप्त जनपदानां चतुर्विंशति: विधानसभासनेभ्य: मतदानं भविष्यति। केन्द्रशासितप्रदेशे एतस्मिन् द्वितीयचरणीयमतदानं सितम्बर मासस्य पञ्च विंशे दिनाङ्के भविष्यति। तथा चा तृतीय चरणस्य मतदानं ओक्टुबरमासस्य प्रथमे दिनांके सुनिश्चितमस्ति। तृतीयचरणीयमतदानाय नामांकनप्रत्यावर्तनस्य अन्तिमः दिवसः अद्यास्ति इति।

राजनाथसिंह

रक्षामंत्री राजनाथसिंहः अद्य अब्रवीत् यत् भारतम् रक्षाक्षेत्रे स्वावलंबिनम भवितुं सर्वकारः प्रतिबद्धः अस्तीति। नरेन्द्रमोदीप्रशासनस्य सम्पूरितशतदिवसानां प्रशंसां कुर्वन् सिंह: अभिव्यक्तवान् यत्, गतेषु त्रिषु मासेषु सार्धैकलक्षकोटिरूप्यकाणां रक्षा-वस्तूनां क्रयणाय मन्त्रालयेन अनुमतिः प्रदत्ता अस्ति। असौ अवदत् यत्, प्रशासनेन एकाधिकपञ्चशतं अधिकानि वस्तूनि सकारात्मक-स्वदेशीकरणसूच्यां समाविष्टानि सन्ति। समाजस्य समेषां वर्गाणां जनानां कल्याणार्थं प्रशासनेन कृताः उपायाः मन्त्रिणा अनेन उल्लिखिताः |

।। इति वार्ताः।।